ॐ श्री गणेशाय नमो नमः ॥

## सार्वधातुकाः

**लट् लङ् लोट् विधिलिङ्** शत्रन्तः शानजन्तः कानजन्तः

इमे सर्वे दशगणरूपाः यथा -

| | | | |
|---|---|---|---|
| १ | भ्वादिगणः | **शप्** प्रत्ययः | **अ** |
| २ | अदादिगणः | **लुक्** प्रत्ययः | - |
| ३ | जुहोत्यादिगणः | **श्लु** प्रत्ययः | - |
| ४ | दिवादिगणः | **श्यन्** प्रत्ययः | **य** |
| ५ | स्वादिगणः | **श्नु** प्रत्ययः | **नु** |
| ६ | तुदादिगणः | **श** प्रत्ययः | **अ** |
| ७ | रुधादिगणः | **श्नं** प्रत्ययः | **न्** |
| ८ | तनादिगणः | **उ** प्रत्ययः | **उ** |
| ९ | क्र्यादिगणः | **श्ना** प्रत्ययः | **ना** |
| १० | चुरादिगणः | **णिच्+ शप्** प्रत्ययौ | **अय/पय** |

**शत्रन्तः** **शतृ**- प्रत्ययः **अत्** (अङ्गक्रिया परस्मैपदे)

**शानजन्तः** **शानच्**- प्रत्ययः **मान** ( भ्वादि-दिवादि-तुदादि-चुरादिगणानामङ्गक्रिया आत्मनेपदे)

**कानजन्तः** **कानच्**- प्रत्ययः **आन** (अदादि-जुहोत्यादि-स्वादि-रुधादि-तनादि-क्र्यादिगणानामङ्गक्रिया आत्मनेपदे)

वर्तमाने लट्।

अनद्यतने लङ्।

विधि-निमन्त्रण-आमन्त्रण-अधीष्ट-संप्रश्न-प्रार्थनेषु लिङ् लोट् च।

आशिषि लिङ्लोटौ।

शत्रन्तः शानजन्तः कानजन्तश्च वर्तमाने सन्ति।

| | शत्रन्तः | शानजन्तः/कानजन्तः |
|---|---|---|
| भ्वादि | गच्छन्त् गच्छन्ती गच्छत् | लभमान लभमाना लभमान |
| अदादि | अदन्त् अदती अदत् | अदान अदाना अदान |
| | सन्त् सती सत् (अस्) | आसीन आसीना आसीन (आस्) |
| जुहोत्यादि | ददत् ददती ददत् | ददान ददाना ददान |
| दिवादि | दीव्यन्त् दीव्यन्ती दीव्यत् | तुष्यमाण तुष्यमाणा तुष्यमाण |
| स्वादि | आप्नुवन्त् आप्नुवती आप्नुवत् | आप्नुवान आप्नुवाना आप्नुवान |
| | सुन्वन्त् सुन्वती सुन्वत् | सुन्वान सुन्वाना सुन्वान |
| तुदादि | तुदन्त् तुदन्ती तुदत् | लुम्पमान लुम्पमाना लुम्पमान |
| रुधादि | युञ्जन्त् युञ्जती युञ्जत् | युञ्जान युञ्जाना युञ्जान |
| तनादि | कुर्वन्त् कुर्वती कुर्वत् | कुर्वाण कुर्वाणा कुर्वाणा |
| | तन्वन्त् तन्वती तन्वत् | तन्वान तन्वाना तन्वान |
| क्र्यादि | क्रीणन्त् क्रीणती क्रीणत् | क्रीणान क्रीणाना क्रीणान |
| चुरादि | चोरयन्त् चोरयन्ती चोरयत् | अर्थयमान अर्थयमाना अर्थयमान |

तिङन्तः **क्रिया**। सुबन्तो **नाम** स्मर्तव्यम्।

| **तिङ्** | | **सुप्** |
|---|---|---|
| परस्मैपदं | आत्मनेपदं | सु औ जस् |
| तिप् तस् झि | त आतां झ | अम् औट् शस् |
| सिप् थस् थ | थास् आथां ध्वम् | टा भ्यां भिस् |
| मिप् वस् मस् | इट् वहि महिङ् | ङे भ्यां भ्यस् |
| | | ङसि भ्यां भ्यस् |
| | | ङस् ओस् आम् |
| | | ङि ओस् सुप् |

लट् लङ् लोट् विधिलिङ् तिङन्ता भवन्ति। शत्रन्तः शानजन्तः कानजन्तः सुबन्ताः।

**भ्वादिगणः**

| **लट्** | **परस्मैपदम्** | | | **आत्मनेपदम्** | | |
|---|---|---|---|---|---|---|
| | एकवचनं | द्विवचनं | बहुवचनम् | | | |
| प्रथमः पुरुषः | वदति | वदतः | वदन्ति | लभते | लभेते | लभन्ते |
| मध्यमः पुरुषः | वदसि | वदथः | वदथ | लभसे | लभेथे | लभध्वे |
| उत्तमः पुरुषः | वदामि | वदावः | वदामः | लभे | लभावहे | लभामहे |
| **लङ्** | अवदत् | अवदताम् | अवदन् | अलभत | अलभेताम् | अलभन्त |
| | अवदः | अवदतम् | अवदत | अलभथाः | अलभेथाम् | अलभध्वम् |
| | अवदम् | अवदाव | अवदाम | अलभे | अलभावहि | अलभामहि |
| **लोट्** | वदतु | वदताम् | वदन्तु | लभताम् | लभेताम् | लभन्ताम् |
| | वद | वदतम् | वदत | लभस्व | लभेथाम् | लभध्वम् |
| | वदानि | वदाव | वदाम | लभै | लभावहै | लभामहै |
| **लिङ्** | वदेत् | वदेताम् | वदेयुः | लभेत | लभेयाताम् | लभेरन् |
| | वदेः | वदेतम् | वदेत | लभेथाः | लभेयाथाम् | लभेध्वम् |
| | वदेयं | वदेव | वदेम | लभेय | लभेवहि | लभेमहि |